# INFLUENCE OF DARŚANAS ON LITERATURE

*Edited by*

Dr.S.GEETHAMONY AMMA
&
Dr.V.PRAMEELA KUMARI

PARIMAL PUBLICATIONS
DELHI

*Published by*
PARIMAL PUBLICATIONS
Office : 27/28, Shakti Nagar, Delhi-110007 (INDIA)
Retail Outlet : 22/3, Shakti Nagar, Delhi-110007 (INDIA)
ph. : +91-11-23845456, 47015168
e-mail : order@parimalpublication.com
url : http://www.parimalpublication.com

© Author

**First Edition : Year 2018**

**ISBN : 978-81-7110-611-0**

**Price : ₹ 350.00**

*Printed at*
**Balajee Imaging Systems**
Wazirpur Village, Delhi-52

# नारायणीये अद्वैतदर्शनस्य प्रभाव

डॉ.एस. शोभन

मेल्पत्तूर नारायणभट्टपादानाम् अतिप्रधानं स्तोत्रकाव्यं भवति नारायणीयम्। तच्च श्रीमद्भागवतार्थसारसंग्रहरूपं भवति। काव्येऽस्मिन् चतुर्त्रिंशदधिकसहस्रश्लोकाः (1034) सन्ति। भट्टपादाः केरलदेशे निलानद्यास्तीरे परिलसतः श्रीनावादेवायतनादविदूरे मेल्पत्तूर इति सुप्रथिते भूसुरागारे 735 (पञ्चत्रिंशदधिकसप्तशततमे) कोलम्बाब्दे जनिमलभन्त। महात्मनः कालः षोडशशतक इति निस्चीयते। भट्टपादैः विरचितस्य प्रक्रियासर्वस्वमिति ग्रन्थस्यान्ते आत्मनःजन्मस्थानकुलादिकं व्यक्तं सूचितम्। तदुक्तम्-

भूखण्डे केरलाख्ये सरितमिह निलामुत्तरेणैव नावा-
क्षेत्रे गव्यूतिमात्रे पुनरुपरिनवग्रामनाम्नि स्वधाम्नि।
धर्मिष्ठाद्भाट्टतन्त्राद्यखिलमतपटोर्मातृदत्तद्विजेन्द्रा-
ज्जातो नारायणाख्यो निरवहृदतुलां देवनारायणाज्ञाम्।। इति।

महात्मनः काव्यानि, स्तोत्राणि, मुक्तकानि प्रबन्धा इत्येवं बहुविधा साहित्यकृतयः, व्याकरण-मीमांसादिषु शास्त्रकृतयश्च उपलब्धाः। साहित्यकृतिषु अतिप्रधानं भवति नारायणीयम्, शास्त्रकृतिषु प्रक्रियासर्वस्वम् च।

नारायणीयस्य देशमङ्गलंवारियर् महात्मना रचिता (टी.गणपतिशास्त्रिणा प्रसिद्धीकृता) 'भक्तप्रिया', कोणत्त् कृष्णवारियर् महात्मना काट्टुकुलत्त् अच्युतवारियर् महात्मना च रचिता 'बालबोधिनी', सहृदयतिलकस्य के. राम पिषारटि महोदयस्य 'रसिकप्रिया' च प्रमुखानि संस्कृतव्याख्यानानि सन्ति।

भक्तिरसप्रधानम् अतिरमणीयं काव्यशिल्पं भवति नारायणीयम्। भक्तस्य आत्मव्यथालाप एव काव्यस्यास्य चैतन्यम्। कलियुगे, मोक्षप्राप्तेः आत्यन्तिकदुःखनिवृत्तेः च उत्तमोपायस्तु भक्तिरित्यत्र समर्थ्यते। श्रीशङ्कराचार्येण विवेकचूडाणौ प्रकाशितोऽयमाशयः-

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी।
स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते।। (श्लोकः 32)

नारदीयभक्तिसूत्रे-भक्तिस्त्वस्मिन् परमप्रेमरूपा यज्ज्ञात्वा मत्तो भवति स्तब्धो भवति आत्मारामो



नारायणीये भक्तेः मुक्तेश्च साम्यमभिधीयते। तदुक्तम् - 'मुक्तेस्तुल्यां तु भक्तिम्' इति। (66, 12) तत्क्रमं व्यनक्ति "त्वत्सोवायां ही सिद्ध्येत् मम तव कृपया भक्तिदार्ढ्यम्। श्लोकः विरागस्त्वत्तत्त्वस्यावबोधोऽपि च भुवनपते यत्नभेदं विनैव"।। (92-1) इति। तस्मात् मुक्तेः परमोपायस्तु भक्तिर्भवतीत्युच्यते। तदुक्तम्- "कर्मज्ञानमयाद् भृशोत्तमतरा भक्तिरिति योगीश्वरैर्गीयते" (2-7)। अपि च ग्रन्थेऽस्मिन् अद्वैतब्रह्मतत्त्वस्य प्रभावोऽपि तत्र सर्वत्रापि सम्यक् द्रष्टुं शक्यते। प्रथमदशके प्रथमस्तोत्रे परमात्मस्वरूपं सुस्पष्टं प्रदर्शितम्।

ॐ सान्द्रानन्दावबोधात्मकमनुपमितं कालदेशावधिभ्यां
निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम्।
अस्पष्टं दृष्टमात्रे पुनरुपुपुरुषार्थात्मकं ब्रह्मतत्त्वं
तत्तावद्भाति साक्षाद्गुरुपवनपुरे हन्त भाग्यं जनानाम्।। (1-1)

जगज्जन्मादिकारणस्य परब्रह्मणः स्वरूपमाह-सच्चिदानन्दस्वरूपम् अखण्डं सजातीयविजातीयस्वगतभेदशून्यं केनाप्युपमातुमशक्यं अतोऽद्वितीयं, कालदेशातीतं, नितरां मुक्तं, निर्मुक्तत्वात् नित्यमुक्तं मायातत्कार्योपरागरहितं, उपनिषद्सहस्रेण निर्भास्यामानं, दृष्टमात्रे अस्पष्टं परमपुरुषार्थात्मकं तत् ब्रह्मतत्त्वं गुरुपवनपुरे साक्षात् भाति। हन्त भाग्यं जनानाम् इत्यत्र 'जनानामित्यविशेषेण निर्देशात् सर्वेषमपि भगवद्भजनाधिकारो द्योत्यते। अत्र सगुणोपासनाद्वारा निर्गुणब्रह्मप्राप्तये भगवतः साङ्गोपाङ्गनिरन्तरध्यानं, तद्वारा परमात्मप्राप्तिः। एवं सच्चिदानन्दं ब्रह्म दुर्लभ्यवस्तुन्यपि सुलभतया हस्तलब्धेऽपि जनाः अर्चनादिना, तन्वा, वाचा, धिया, देवतान्तरं विषयान्तरं वा भजन्ते एतत् असारता एव। किन्तु वयं (मनुष्याः) स्थिरतरमनसा विश्वपीडापहत्यै समस्तदुःखनिवृत्तिरूपमोक्षार्थं निःशेषात्मानं (चराचरात्मकोऽयंप्रपञ्चः आत्मा यस्य स निश्शेषात्मानं) गुरुपवनपुराधीशमाश्रयमः। तदुक्तम्- "एवं दुर्लभ्यवस्तुन्यापि सुलभतया हस्तलब्धे यदन्यत्...(1-2)इति "एवं भक्तियोगेन भगवन्तम् उपास्यताम् इति प्रतिपाद्य, गुरुपवनपुराधीशस्य भगवतः परमात्मनः स्वरूपं वर्ण्यते-

सत्त्वं यत्तत् पराभ्यामपरिकलनतो निर्मलं तेन तावत्
भूतैर्भूतेन्द्रियैस्ते वपुरिति बहुशः श्रूयते व्यासवाक्यम्.........।
तत्स्वच्छत्वाद्यदच्छादितपरसुखचिद्गर्भनिर्भासरूपम्
तस्मिन् धन्या रमन्ते श्रुतिमतिमधुरे सुग्रहे विग्रहे ते।। (1-3)

ततः शुद्धसत्वमयीं भगवतः मूर्तिं उपपाद्य तस्यां निष्कलब्रह्माभेदं प्रतिपाद्यते-

"निष्कम्पे नित्यपूर्णे निरवधिपरमानन्दपीयूषरूपे
निर्लीनानेकमुक्तावलिसुभगतमे निर्मलब्रह्मसिन्धौ।

कल्लोलोल्लासतुल्यं खलु विमलतरं सत्त्वमाहुस्तदात्मा
कस्मान्नो निष्कलस्त्वं सकल इति वचस्त्वत्कलास्वेव भूमन्"।। (1-4) इति।

भगवत् तु निष्कलः नित्यपूर्णः परमात्मा एव। निर्विकारपरिपूर्णब्रह्मणः शुद्धसत्वस्य भगवतः च ब्रह्मसिन्दो कल्लोलोल्लासतुल्यत्वम्। श्लोकस्य अन्ते सकल इति विशेषणेन मत्स्यादि अंशावताराः सूच्यन्ते। ततो अजः भगवान् स्वतः निष्क्रियः सन् निष्कारणां ईक्षणाख्यां मायाप्रेरणात्मिकां क्रियां भजते। तस्मात् सा माया असतिकल्पा अपि सृष्टिदशायां मूलप्रकृतेरुदेति। सा संशुद्धं कमपि तमतिरोधायकं सत्त्वांशं धृत्वा स्वमहिमप्रभावपूर्णं रूपं दधाति। तदा निष्कलं परं ब्रह्म सकलः भगवद्स्वरूपः स्यात्। "तदैक्षत बहु स्यां प्रजायेय तत्त्तेजो/सृजत" (छान्तो.VI-2.3) इत्याद्युपनिषद्वाक्यानां सार एव अत्र प्रकाशितः अथ सप्तम- अष्टम स्तोत्राभ्यां भगवतः लोकोत्तरं सौन्दर्यमुपवर्ण्य, लोकोत्तरफलदातृत्वञ्च प्रकाशितम्। तद्ययथा-

नम्राणां सन्निधत्ते सततमपि पुरस्तैरनभ्यर्थितानप्यर्थान्
कामानजस्रं वितरति परमानन्दसान्द्रां गतिंश्च।
इत्थं निशेषलभ्यो निरवधिकफलः पारिजातो हरेस्त्वं
क्षुद्रं तं शक्रवाटीद्रुममभिलषति व्यर्थमर्थिव्रजो/यम्।। (1-8)

भगवान् नम्राणां पुरतः सततमपि सन्निधत्ते, भक्तैः अनभ्यर्थितान् अभीष्टान्भोगान्, धनानि, अखण्डानन्दस्वरूपां मोक्षगतिं च सदा वितरति। हरिः निरवधिकफलपारिजातः भवति। अत्र अभ्युदयनिश्रेयसयोर्मध्ये निश्रेयसः नित्यत्वं, अन्यस्य अनित्यत्वञ्च सूच्यते। भगवान् तु स्वात्मानं (ब्रह्मसायूज्यमुक्तिं) ददाति। इतरे देवाः लोकेषु इतरेषां ईशितारः भगवान तु स्वात्मनो/पि ईश्वरः। अत्र इतरदेवताविषयक सगुणोपासनानिर्देशो/पि अखण्डसच्चिदानन्दपरमात्मावाप्तये इति निरूपिता।

ततः त्रिनवतितमदशके ज्ञानसहितां भक्तिं प्रतिपादयन् मायामयमखिलं इदं जगत् क्षणिकं वृद्धिक्षयोपेतं नश्वरमिति च, चराचरात्मकं सर्वं सूक्ष्मं निरीक्ष्य तेषां असारतां च निरूप्य परमात्मनः शाश्वतत्वं स्थापितम्।

बन्धुस्नेहं विजह्यां तव हि करुणया त्वय्युपावेशितात्मा
सर्वं त्यक्त्वा चरेयं सकलमपि जगद्वीक्ष्य मायाविलासम्।
नानात्वात् भ्रान्तिजन्यात् सति कलु गुणदोषावबोधे विधिर्वा
व्यासेधो वा कथं तौ त्वयि निहितमतेर्वीतवैषम्यबुद्धेः।। (93-1)

भक्तः भगवत्कृपया बन्धुमित्रादिषु अत्यासक्तिं परित्यजति। सः सर्वकर्मफलासङ्गं त्यक्त्वा कर्म (कायवाङ्मनसां विधिनिषेधरूपं कर्म) करोति। इदं जगत् सर्वं भगवन्मायाकल्पितं भवति। भ्रान्तिजन्यात्



नानात्वात् लौकिका एव वेदविहितविधिनिषेधकर्माधीनाः भवन्ति। किन्तु ब्रह्मैव समस्तमिति निश्चित्य ईश्वरे समर्पितबुद्धिः भक्तः विधिनिषेधातीतो ज्ञानमिश्रभक्तियोगे/धिकारी इत्यत्र सूच्यते। तथा मायामयस्य अखिलप्रपञ्चस्य नश्वरत्वं, परमात्मनः शाश्वतत्वं च सम्यक् प्रतिपादितम्। अत्र श्रीशङ्करभाष्य- प्रकरण - स्त्रोत्रकृतिभ्यः प्रकाशितं यदात्मतत्वं तदेवात्र भट्टपादेन प्रतिपादयते। तदर्थं भक्तिरेव उत्तममार्ग इति। अथ "क्षुत्तृणालोपमात्रे सततकृतधियो जन्तवः...." इत्यादि स्तोत्रेण, एतत् सर्वं पुरुषशरीरेणैव साध्यम्, तिर्यगादिदेहेभ्यः पुरुषतनुरुत्कृष्टेति पुरुषजन्म स्तौति। केवलं क्षुत्तृणालोपमात्रे अनवरतं निश्चितचित्ताः पश्वादयः प्राणिनः बहवः वर्तन्ते। तेषु मध्ये मनुष्यः विज्ञानवान् श्रेष्ठः। एवं सुकृतफलत्वात् मनुष्यजन्म दुर्लभमेव। तत्रापि आत्मा आत्मनः सुहृद् स्यात्, रिपुः च। यो ईश्वरे न्यस्तचेतः संसारदुःखोच्छेदे उपायं स्मरति स सुहृत्, अन्यः स्वात्मवैरी च। तदुक्तं भगवद्गीतायां "आत्मैवह्यात्मनो बन्धुरात्मैवरिपुरात्मनः" इति। (VI.5) दशके/स्मिन् अष्टमश्लोके जगतः सृष्टिस्थितिसंहारकारकः भगवान् श्रीकृष्ण एवेति ऊर्णनाभिदृष्टान्तेन समर्थ्यते। ऊर्णनाभिः स्वेन सृष्टं तन्तुवितानं स्वस्मिन्नेव संहरति च। भगवद्ध्यानेन स्वस्वरूपं प्राप्नोतीति पेशकार दृष्टान्तेन ज्ञातुं शक्यते। ततः चतुर्विंशतिगुरुन् प्रतिपाद्य विवेक विरक्तिकरत्वात् सर्वेभ्यः देहगुरोः श्रेष्ठत्वं समर्थ्यते "विड्भस्मात्मा च देहो" इत्यादिना। विवेक-वैराग्यादीनां श्रावयिता गुरुवरः भवति अयं देहः। एवं देहस्य गुरुवरत्वं सामान्येन उक्त्वा कविः स्वशरीरस्य विशेषमाह-बहुरुजा पीडितः अयं देहः विवेकवैराग्ययुक्त इति। अतः मोक्षसाधकस्यास्य देहस्य क्षुद्रे विषयरसे आसक्तिः त्याज्या। अद्वैततत्वज्ञानमेव भट्टपादेन अत्र सुस्पष्टं सुदृष्टान्तं प्रकाशितम्। मुण्डके "यथोर्णनाभिः सृजते गृहणते च यथा पृथिव्यां ओषधयः संभवन्ति। यथा सतः पुरुषात् केशलोमानि तथाक्षरात् संभवतीह विश्वम्।" (II.2.9) भजगोविन्दे: "मा कुरु धनजनयौवनगर्वं.... मायामयमिदं अखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्व (2-11) गीतायामपि "उद्धरेदात्मनात्मानं....। (6.6) इति। अथ चतुर्नवतितमदशके तत्वज्ञानोत्पत्तिप्रकारमुच्यते-

"शुद्धा निष्कामधर्मैः प्रवरगुरुगिरा तत्स्वरूपं परं ते
शुद्धं देहेन्द्रियादिव्यपगतमखिलं व्याप्तमावेदयन्ते।
नानात्वस्थौल्यकार्श्यादि तु गुणजवपुस्सङ्गतो/ध्यासितं ते
वहनेर्दारूपभेदेष्विव महदणुतादीप्तताशान्ततादि।।" (94-1)

निष्कामधर्मैः शुद्धाः कामनारहितैः विहितनित्यनैमित्तिककर्मानुष्ठानैः दुरितक्षयेण निर्मलान्तःकरणाः साधनचतुष्टयसंपन्नाः पुरुषाः, वेदवेदान्तेषु तदर्थेषु च निष्णाताः श्रेष्ठगुरोः उपदेशात् देहेन्द्रियादिव्यतिरिक्तं शुद्धं मायातत्कार्योपरागरहितं सर्वानुस्यूतम् परं तत् निष्कलं स्वरूपं सम्यगवगच्छन्ति। तदुक्तम् छान्दोग्ये - "आचार्यवान् पुरुषो वेद" इति। शरीरस्य नानात्वस्थौल्यकार्श्यादि तु मायागुणेभ्यो

जायन्ते। आत्मनः शरीरस्य चान्योन्याध्यासेन नानात्वादेः आत्मनि कल्पितत्वात् न वास्तवत्वमिति। अत्रानुरूपं दृष्टान्तमाहदारुप्रदेशेषु अग्नेः महदणुतादीप्तताशान्ततादि इव इति। तस्मात् आचार्याल्लब्धं ज्ञानमेव आज्ञानतत्कार्यनिरसनक्षममिति स्फुटीकर्तुं आह-

आचार्याख्याधरस्थारणिसमनुमिलच्छिष्यरूपोत्तरार-
ण्यावेधोद्भासितेन स्फुटतरपरिबोधाग्निना दह्यमाने।
कर्मालीवासनातत्कृततनुभुवनभ्रान्तिकान्तारपूरे
दाह्याभावेन विद्याशिखिनि च विरतेत्वन्मयी खल्ववस्था।। (94-2)

आचार्याख्यः अधरस्थारणिः (अधगतमथनकाष्ठविशेषः) उपनयनद्वारा सन्निधिं प्राप्तो यो शिष्यः स उत्तरारणिः (उपरिगतमथनकाष्ठविशेषः) च। तयोरावेधः प्रवचनरूपेण मथनदण्डेन उद्भासितेन परिबोधाग्निना सजातीयकर्मणामाली, कर्मवासना, तदुत्थतनुभुवनभ्रान्तिश्च नश्यति। यदा गुरुशिष्यप्रवचनजनितं ब्रह्मज्ञानं अज्ञाननाशं करोति तदा परात्मैक्यावस्थैव वर्तते। दशकेऽस्मिन् विवेकचूडामणि वेदान्तसार आत्मबोधनामकेषु प्रकरणग्रन्थेषु प्रतिपादितः अद्वैतसिद्धान्तसार एव द्रष्टुं शक्यते। संसारदुःखनिवृत्तये उत्तममार्गस्तु भक्तिरेव। अतः देहादिषु अभिमानो न कार्यः। भयरहितो लोकः वैकुण्ठः। तस्मात् दृढभक्त्या सः लोक एव प्राप्तव्य इति "त्वल्लोकादन्यलोकः क्वनु भयरहितः" (94.4) इत्यादि श्लोकेन प्रतिपाद्यते। अतः सर्वतो विरक्तस्य आचार्यवतः पुरुषस्य संसारदुःखोच्छेदः परमानन्दावाप्तिश्च उपदिष्टा। श्रुतिश्च "भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।" (मुण्ड. उप. 2-2-9)

पुनःभगवद्गीतायां - "ज्ञानाग्निः सर्वकर्माणि भस्मासात्कुरुतेऽर्जुन" (IV.37) इति। एवमात्माऽरणौ, ध्यानमथने सततं कृते उदिता अवगतिज्वाला सर्वाज्ञानेन्धनं दहति। आत्मान्तः करणमेवाऽरणिः तस्मिन् मननमेव उत्तरारणिः। ध्यानेन तयोः मथने सर्वदा तत्रोदिता ज्वालास्वरूपा भगवदवगतिः विद्या, यदा सर्वाऽज्ञानेन्धनं निश्शेषतः नाशयति तदा मुमुक्षुः स्वाराज्ये अभिषिक्तः कृतकृत्यः भवति। नारायणीयेऽपि आचार्याद् लब्धं ज्ञानमेव अज्ञानतत्कार्यनिरसनक्षममिति दृष्टान्तेन समर्थ्यते।

पञ्चमश्लोके जीवात्मपरमात्मनोरनन्यत्वं बन्धमोक्षौ वा वस्तुतः न स्तः, तौ ईश्वरस्य मायाऽविद्यातनुभ्यां विरचितौ स्वप्नबोधोपरमौ इति प्रतिपाद्यते। अथ बद्धमुक्तयोः वैलक्षण्यमाह- एकः देहद्रुमस्थः विषयफलरसान् भुङ्क्ते। अपरः मुक्तः निर्व्यथात्मा ईश्वरभावे (परमात्मभावे) स्थितः भोगसुखातीतः सन् विराजते च। तदुक्तम् - "यथार्थ्यात् त्वन्मनस्येव हि मम न विभो.... भुङ्क्ते देहद्रुमस्थो विषयफलरसान् नापरो निर्व्यथात्मा" (94.5) इति। अयमाशयः मुण्डकोपनिषदि-

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्न्यो अभिचाकशीति" (III.1.1)



तद्वत् माण्डूक्यकारिकायां "न निरोधो नचोत्पत्तिर्नबद्धो न च साधकः...." (II-32) भगवद्गीतायां "न जायते म्रियते वा कदाचिन्नायां भूत्वा अभविता वा न भूयः" (II.20) एवं विवेकचूडामणौ अपि बन्धमोक्षौ सविस्तरं प्रतिपाद्येते 'अयमात्मा ब्रह्म' इति (माण्डूक्योपनिषत्-2) महावाक्ये प्रतिपादितं तत्त्वं अत्र स्पष्टं सूच्यते। अन्तिमश्लोकेऽपि भक्तिरेव मोक्षहेतुरिति मदृष्टान्तमाह- "ऐक्यं ते दानहोमव्रतनियमत- परसांख्ययोगैर्दुरापं... तन्मे त्वद्भक्तिमेव द्रढय हर गदान् कृष्ण वातालयेश" (94-10) इति।

अथः षण्णवतितमदशके प्रथमश्लोके भगवतः विभूतिं निरुप्यते। तद्यथा-

त्वं हि ब्रह्मैव साक्षात् परमुरुमहिमन्नक्षराणामकार-
सारो मन्त्रेषु राज्ञां मनुरसि मुनिषु त्वं भृगुर्नारदोऽपि।
प्रहलादो दानवानां पशुषु च सुरभिः पक्षिणां वैनतेयो
नागानामस्यनन्तः सुरसरिदपि च स्रोतसां विश्वमूर्ते।। (96-1)

एते सर्वे श्लोकाः भगवान् एकैव परमात्मा इति समर्थयन्ति। ततः द्वाभ्यां स्तोत्राभ्यां भगवतः विभूतेः माहात्म्यं प्रतिपादितम्। प्रकृतिपुरुषात्मके प्रपञ्चेऽस्मिन् भगवन्तं ऋते किञ्चिद् वस्तु न प्रतीयत इति। अत्र "सर्वम् खल्विदं ब्रह्म" (छा.उ.3.14.1) इति उपनिषत्सार एव काव्यात्मकेन, आशयगाम्भीर्येण च निरूपितः।

अथ ईश्वरार्पणबुद्ध्या स्वधर्मानुष्ठानात् वैराग्यं तद्वारा मुक्तिरित्याह - "धर्मं वर्णाश्रमाणां श्रुतिपथविहितं त्वत्परत्वेन भक्त्या" (96-3) भिन्नेषु अखिलपदार्थेषु अभिन्नं कटककुण्डलादौ सुवर्णवत् कारणरूपेणैकत्वेन स्थितं, भिन्नेषु घटपटादिषु कार्येषु घटः सन्, पटः सन् इत्येकरूपा या सत्ता, तदेव सच्चिदानन्दं ब्रह्मेति। अत्र ब्रह्मज्ञानिनां न पुनरावृत्तिरिति समर्थ्यते। अनन्तरस्तोत्रे कर्म-ज्ञान-भक्तियोगोपादानं चेत् अधिकारिभेदादेव इत्युक्तम्। तद्यथा-

ज्ञानं कर्मापि भक्तिस्त्रितयमिह भवद्प्रापकं तत्र ताव-
न्निर्विण्णानामशेषे विषय इह भवेज्ज्ञानयोगेऽधिकारः।

अथ अष्टनवतितमदशके प्रथमश्लोके जगतः उत्पत्ति-स्थितिलयककारणत्वम् भगवतः विष्णोः निष्कलत्वं च प्रसाध्य तद्रूपेण स्तौति-

"यस्मिन्नेतद्विभातं यत इदमभवद्येन चेदं य एतद्योऽ-
स्मादुत्तीर्णरूपः खलु सकलमिदं भासितं यस्य भासा"

इत्यादि। सकलमिदं जगत् यस्मिन्नधिष्ठाने अध्यस्तं भवति, यतः जातम्, येन च जीवति, तिष्ठति,

लीयते च इत्यनेन श्लोकभागेन ब्रह्मणः सृष्टि-स्थिति-संहार-हेतुत्वं प्रतिपाद्य, इदं यस्य चिच्छक्त्या भासितं, यः वाचां मनसां अतिदूरे भवति, अत एव दवाः मुनीन्द्राश्च तस्य पारमार्थिकं स्वरूपं न विदुः। अत्रापि सृष्टिप्रतिपादकश्रुतेराशय एव प्रकाशितः। तदेवम्- "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व तद्ब्रह्म" इति (तै.उ.3.1.1) "तस्य भासा सर्वमिदं विभाति" (मु.उ 2.2.15) यस्य भासा चिच्छक्त्या भासितं वाचो मनांसि न प्राप्नुवन्ति इत्येवं बहूनां उपनिषद्वाक्यानां सारांशः एकस्मिन् श्लोके कविना गाम्भीर्येण, सुसौन्दर्येण च प्रतिपादितम्। वस्तुतः परमात्मनः (ब्रह्मणः) जन्म-कर्म-गुण-दोषादयः नास्ति, किन्तु लोकहिताय ईश्वरः मायावशात् जन्मादि स्वीकृत्य स्वतः अरूपोऽपि स्वशक्त्या बहुतररूपत्वं, अद्भुतस्वरूपत्वं, पररसपरिपूर्णत्वं, च स्वीकरोति इत्येवं द्वितीय श्लोके अद्वयं सच्चिदानन्दं परमात्मानं निरुत्यते। अस्मिन् दशके जगज्जन्मादिकारणाय, जगदनुग्राहकाय, पररसपरिपूर्णाय कैवल्यधाम्ने-मोक्षनिलयाय विष्णवे नमस्कार उक्तः। ततः विष्णोः बहुतररूपत्वे सति अरूपत्वं कथमित्याशङ्कायां तत्स्वरूपस्य सर्वद्वैतनिषैधत्वं उपपाद्यते-

"नो तिर्यञ्च मर्त्यं न च सुरमसुरं न स्त्रियं नो पुमांसं
न द्रव्यं कर्म जाति गुणमपि सदसद्वापि ते रूपमाहुः।
शिष्टं यत् स्यान्निषेधे निगमशतैर्लक्षणावृत्तिस्तत्
कृच्छ्रेणावेद्यमानं परमसुखमयं भाति तस्मै नमस्ते" इति (98-3)

अत्र वेदोपनिषद्वाक्यैः लक्षणावृत्या च अत्यायासेन आवेद्यमानं परमानन्द रूपं परमात्मचैतन्यम् एव भगवद्रूपेण वर्ण्यते। 'नेति नेति' (बृ.उ.2.3.6) इति बृहदारण्यकश्रुत्या सर्वद्वैतनिषेधे यदेकंऽवशिष्यते तद् ब्रह्मेति ब्रह्मविदः वदन्ति। श्रीशङ्करस्य दशश्लोक्यां "न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः..... तदेकोवशिष्ट शिव केवलोऽहम" (1) इत्यादिश्लोकानामशय एव भट्टपादेन श्लोकेऽस्मिन् निरूप्यते। अत्र निर्गुणं, निराकारं, एकं अद्वयं ब्रह्मैव गुरुपवनपुरे सगुण-साकारेण विराजते इति समर्थ्यते।

अथ सप्रपञ्चनिष्प्रपञ्चभेदेन भगवद्स्वरूपं स्तुत्वा तस्य सर्वसाक्षित्वं सर्वनियन्तृत्वञ्च स्तौति-

"यद्भीत्योदेति सूर्यो दहति च दहनो वाति वायुस्तथाऽन्ये
यद्भीताः पद्मजाद्याः पुनरुचितबलीनाहरन्तेऽनुकालम्।
येनैवारोपिताः प्राङ्निजपदमपि ते च्यावितारश्च पश्चा-
त्तस्मै विश्वं नियन्त्रे वयमपि भवते कृष्ण कुर्म प्रणामम्।।" इति (98-8)



अनेन स्तोत्रेण सूर्यादयोऽपि स्वनियन्तारं भगवन्तं प्रणमन्तीति द्योत्यते। अथ भगवद्वपुषः सर्वोत्कृष्टत्वमुच्यते-

"सत्यं शुद्धं विशुद्धं जयति तव वपुर्नित्यमुक्तं निरीहं
निर्द्वन्द्वं निर्विकारं निखिलगुणगणव्यञ्जनाधारभूतम्
निर्मूल निर्मलं तन्निरवधिमहिमोल्लासि निर्लीनमन्त-
र्निस्सहङ्गानां मुनीनां निरुपमपरमानन्दसान्द्रप्रकाशम्।" (98-10) इति।

सत्यं, शुद्धं, विशुद्धं, नित्यमुक्तं, निरीहं, निर्द्वन्द्वं, निर्विकारं, निखिलयुगगणव्यञ्जनाधारभूतं निर्मूलं, निर्मलं, निरवदिमहिमोल्लासि निस्सङ्गानां मुनीनां अन्तः निर्लीनं निरुपमपरमानन्दसान्द्रप्रकाशं भगवतः वपुः सर्वोत्कर्षेण वर्तते। सत्यं परमार्थतः स्थितम्, असतः सत्ताप्रदत्वात्। शुद्धं शुद्धसत्वमयम्। विशुद्धं स्वप्रकाशसिद्धम्। नित्यमुक्तं नित्यमुक्तावस्थया बन्धराहित्येन स्थितम्। नित्यं प्रपञ्चस्योत्पत्तेः प्राक् पश्चादपि विद्यमानत्वदुत्पत्तिलयरहितं सत्। एतत्सर्वं उपनिषद्भिः वर्णितं निर्गुणब्रह्मणः स्वरूपं एव। 'उपसकानाम् कार्यार्थं ब्रह्मणो रूपकल्पना इति इत्येतत् नारायणीये अन्वर्थम्।

एवं नारायणीये अद्वैतदर्शनस्य प्रभावो सम्यक् द्रष्टुं शक्यते। उपासकानां अभ्युदयनिश्रेयससिद्ध्यर्थ ब्रह्म सगुण-निर्गुणभदेन निर्दिश्यते। चार्वाकेतर सांख्य योगादि सर्वदर्शनानां निरूपणेन ज्ञान-कर्म-भक्तियोगानां निरूपणेन च भक्तानां मनसि सच्चिदानन्दस्वरूपस्य परमात्मनः अनुचिन्तनं तद्वारा ब्रह्मावप्तिश्चोपदिष्टा।